योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०७३

अज्ञातलेखकः

त्रिसप्ततितमः सर्गः ७३

श्रीवसिष्ठ उवाच ।

कर्कटीकटुवृत्तान्तं सर्वमाकर्ण्य वासवः ।

नारदं परिपप्रच्छ पुनर्जातकुतूहलः ।। १

शक्र उवाच ।

सूचीवृत्तपिशाचत्वं तपसोपार्ज्य तत्तया ।

कर्कट्या हिममर्कट्या के भुक्ता विभवा मुने ।। २

श्रीनारद उवाच ।

जीवसूच्याः पिशाचत्वं गतायाः शक्र पेलवम् ।

आसीत्कार्ष्णायसी सूची तस्याः समवलम्बनम् ।। ३

तत्समालम्बनं त्यक्त्वा व्योमवातरथस्थया ।

प्राणमारुतमार्गेण तया देहप्रविष्टया ।। ४

सर्वेषामान्त्रतन्त्रीणां स्नायुमेदोवसासृजाम् ।

रन्ध्रेण पक्षिणेवान्तर्निलीनं मलिनात्मनाम् ।। ५

यस्यां नाड्यां नभोवायुर्माति तत्तामुपेतया ।

तत्र शूलं कृतं स्थूलन्यग्रोधाग्र इवोत्कटम् ।। ६

तच्छरीरेन्द्रियैस्तानि तथान्यानि बहूनि च ।

भुक्तानि नरमांसानि भोजनान्युचितानि च ।। ७

सुप्तं विवलितानल्पमालया मुग्धबालया ।
कान्तवक्षःस्थलस्यूतसृष्टपत्रकपोलया ।। ८
विद्रुतं वीतशोकासु विहङ्गा वनवीथिषु ।
कल्पद्रुमौघपुष्पाग्रद्विगुणाम्भोजपङ्क्तिषु ।। ९
पीत आमोदमन्दारमकरन्दकणासवः ।
वनेष्वमरशैलानामलिन्यामलिलीलया ।। 3.73.१०
चर्वितानि शवाङ्गानि गृध्र्याऽऽगर्तानि वृद्धया ।
खड्गपृष्ठ्येव संग्रामे वीराङ्गानि जवेद्धया ।। ११
सर्वाङ्गकोशनाडीषु दिक्ष्विवानिललेखया ।
उड्डीनमवडीनं च काचौघव्योमवीथिषु ।। १२
विराडात्महृदि प्राणवातस्पन्दाः स्फुरन्ति तु ।
यथा तथा प्रस्फुरितं प्रतिदेहगृहं तया ।। १३
सर्वप्राणिशरीरेषु भान्ति चिच्छक्तयस्तथा ।
दीपप्रभाभासितया गृहिण्येव स्वसद्मसु ।। १४
विहृतं रुधिरेष्वन्तर्द्रवशक्त्येव वारिषु ।
अब्धिष्वावर्तवृत्त्येव जठरेषु विवल्गितम् ।। १५
सुप्तं मेदःसु शुभ्रेषु शेषाङ्गेष्विव शौरिणा ।
स्वादितश्चाङ्गगन्धोऽन्तः पीतशक्त्यामृतं यथा ।। १६
तरुगुल्मौषधादीनां हृदौजान्यनिलश्रिया ।
परिभुक्तान्यशुक्लानि हिंसयोधीकृतानि च ।। १७
अथो जीवमयी सूची स्यामिति स्थावरेण सा ।
संपन्ना तापसी सूची चेतना पावनी सिता ।। १८
अदृश्यया तया चेह मारुतोग्रतुरंगया ।
अयःसूच्याऽनिलतया वहन्त्या दिक्ष्वरुद्धया ।। १९
पतिं भुक्तं विलसितं दत्तं दापितमाहृतम् ।
नर्तितं गीतमुषितमनन्तैः प्राणिदेहकैः ।। 3.73.२०

अदृश्ययाऽशरीरिण्या मनःपवनदेहया ।

कृतमाकाशरूपिण्या न तदस्ति न यत्तया ।। २१

मत्तया शक्तयास्वादरसाच्चलितमेतया ।

कालमालानमाश्रित्य करिण्येव विवल्गितम् ।। २२

कल्लोलबहुलाधूतदेहदृष्टनदीष्वलम् ।

वेगैर्वैधुर्यकारिण्या मत्तया मकरायितम् ।। २३

अशक्तया निगिरितुं मेदोमांसं तथा हृदि ।

नूनं रुदितमर्थाढ्यवृद्धातुरधिया यथा ।। २४

अजोष्ट्रमृगहस्त्यश्वसिंहव्याघ्रादिनर्तितम् ।

नर्तक्येव चिरं रङ्गे वलयाङ्गदमङ्गके ।। २५

बहिरन्तश्च वायूनामेकत्वमनुजातया ।

गन्धलेखिकयेवान्तः स्थितं दुर्बलया तथा ।। २६

मन्त्रौषधितपोदानदेवपूजादिभिर्हता ।

बहिर्गिरिनदीतुङ्गतरङ्गवदुपद्रुता ।। २७

दीपप्रभेवाविज्ञातगतिर्गत्याशु लीयते ।

अयःसूच्यां मातरीव तत्र निर्वृतिमेति सा ।। २८

स्ववासनानुसारेण सर्व आस्पदमीहते ।

सूचित्वमेव राक्षस्या सूचीत्वेनास्पदीकृतम् ।। २९

सर्वा विहृत्यापि दिशः स्वमेवास्पदमापदि ।

जीवसूची लोहसूचीमिवायाति जडो जनः ।। 3.73.३०

एवं प्रयतमाना सा विहरन्ती दिशो दश ।

मानसीं तृप्तिमायाता न शारीरीं कदाचन ।। ३१

सति धर्मिणि धर्मा हि संभवन्तीह नासति ।

शरीरं विद्यते यस्य तस्य तत्किल तृप्यति ।। ३२

अथ तृप्तस्य देहस्य स्मरणात्प्राक्तनस्य सा ।

बभूव दुःखितस्वान्ता पूर्णोदरसुखार्थिनी ।। ३३

ततः प्राक्तनदेहार्थं करिष्ये विपुलं तपः ।

इति संचिन्त्य तपसे देशं निर्णीय सात्मना ।। ३४

विवेशाकाशगृध्रस्य हृदयं तरुणस्य सा ।

प्राणमारुतमार्गेण खं खगीव बिलेशया ।। ३५

गृध्रः स्वामयसूचित्वं कश्चिदेतत्समाश्रितः ।

नितान्तप्रेरितः सूच्या कर्तुं मन उपाददे ।। ३६

सूचीमादाय गृध्रोऽसौ ययौ तच्चिन्तितं गिरिम् ।

अन्तःसूचिपिशाच्यन्ते नुन्नोऽब्द इव वायुना ।। ३७

तत्राजने महारण्ये स्थापयामास तामसौ ।

सर्वसंकल्परहिते पदे योगीव चेतनाम् ।। ३८

एकेनैवाशु सा तेन पादप्रान्तेन सुस्थिता ।

संप्रतिष्ठापितेवाद्रिमूर्ध्नि गृध्रेण देवता ।। ३९

रजःकणगृहस्थाणुशिरस्येकेन सानुना ।

पादेनातिष्ठदुद्ग्रीवं शिखीव गिरिमूर्धनि ।। 3.73.४०

उत्थितां स्थापितां सूचीं गृध्रेण जीवसूचिका ।

दृष्ट्वा बहिर्विनिर्गन्तुं खगदेहात्प्रचक्रमे ।। ४१

खगदेहान्निर्जगाम सूची प्रोन्मुखचेतना ।

पवनाद्गन्धलेखेव घ्राणवातलवोन्मुखी ।। ४२

जगाम गृध्रः स्वं देशं भारं त्यक्त्वेव भारिकः ।

निवृत्तव्याधिरिव स बभूवान्तरनाकुलः ।। ४३

अतः सूचिस्तयाधारस्तपसे परिकल्पिता ।

दृढः सुसदृशोऽर्थानां विनियोगो हि राजते ।। ४४

न ह्यमूर्तस्य सिध्यन्ति विनाधारं किल क्रियाः ।

इत्याधारैकनिष्ठत्वमाश्रित्यासौ तपःस्थिता ।। ४५

जीवसूची लोहसूचीं पिशाची शिंशपामिव ।

सर्वतो वलयामास वात्येवामोदलेखिकाम् ।। ४६

ततस्ततः प्रभृत्येषा सूची दीर्घतपस्विनी ।

अरण्यान्यां स्थिता शक्र तत्र वर्षगणान्बहून् ।। ४७

तस्या वरार्थं यत्नं त्वं कुरु कर्तव्यकोविद ।

चिरेण संभृतं लोकमलं दग्धुं हि तत्तपः ।। ४८

श्रीवसिष्ठ उवाच ।

इति नारदतः श्रुत्वा शक्रः सूचीनिरीक्षणे ।

मारुतं प्रेषयामास दशदिङ्मण्डलान्यथ ।। ४९

जगामाथ मरुत्संविदात्मना तामवेक्षितुम् ।

अथामुच्य नभोमार्गं विचचार त्वरान्वितः ।। 3.73.५०

सा तस्य संवित्क्षिप्रार्धेनैव सर्वगता सती ।

परमार्चिरिवाविघ्नं सहसैव ददर्श ह ।। ५१

भूमेः सप्तसमुद्रान्ते निबद्धां विपुलस्थलीम् ।

लोकालोकाद्रिरसनां ततो मणिमयोपमम् ।। ५२

स्वादूदकाब्धिवलयं सकोटरककुब्गणम् ।

पुष्करद्वीपवलयं तदन्तर्गिरिमण्डले ।। ५३

मदिराम्भोधिवलयं तज्जलेचरसंस्थितम् ।

गोमेदद्वीपकटकं तन्मध्यविषयव्रजम् ।। ५४

इक्षूदकाब्धिपरिखं शान्तं गिरिगणान्तरम् ।

क्रौञ्चद्वीपोर्वरापीठं शान्तं गतगिरिक्रमम् ।। ५५

क्षीराब्धिमुक्तावलयं समध्यगतनायकम् ।

श्वेताख्यद्वीपवलयं सभूतप्रविभागकम् ।। ५६

ततो घृतोदवलयस्वान्तस्थपुरमन्दिरम् ।

कुशद्वीपवृतिव्याप्तं समहाशैलकोटरम् ।। ५७

दध्यम्भोराशिरशनासान्ताम्बरपुरोदरम् ।

शाकद्वीपोर्वराकारं सान्तस्थविषयान्तरम् ।। ५८

क्षाराम्भोराशिपरिधिं सान्तस्थविषयान्तरम् ।

जम्बूद्वीपे महामेरुं कुलपर्वतसंकुलम् ।। ५९

वातस्कन्धेभ्य एवादौ पतितानिलवेदना ।

क्रमेणानेन पर्यन्ते तेनैव प्रसृतोऽञ्जसा ।। 3.73.६०

वायुरालोकयन्नद्धा जम्बूद्वीपं निरीक्ष्य च ।

तत्प्राप हिमवच्छृङ्गं यत्र सूची तपस्विनी ।। ६१

शृङ्गमूर्ध्नि महत्युग्रे सारण्यानीमवाप ताम् ।

द्वितीयाकाशविततां वर्जितां प्राणिकर्मभिः ।। ६२

असंजाततृणव्यूहां निकटत्वाद्विवस्वतः ।

रजोमयीमेव ततां संसाररचनामिव ।। ६३

मृगतृष्णानदीसार्थपूरणीयाब्धितां गताम् ।

शक्रकोदण्डसंकाशमृगतृष्णासरिच्छताम् ।। ६४

अमितानन्तपर्यन्तां लोकपालेक्षितैरपि ।

केवलं पवनस्पन्दप्रवहद्धूलिकुण्डलाम् ।। ६५

सूर्यांशुकुङ्कुमालिप्तां लग्नचन्द्रांशुचन्दनाम् ।

विलासिनीमिव व्योम्नो वातसूत्कारपायिनीम् ।। ६६

सप्तद्वीपसमुद्रमुद्रणसमुच्छन्नैकदेशाश्रयं

भूपीठं परितो विहृत्य पवनो दीर्घाध्वना जर्जरः ।

तां प्राप्योग्रगिरिस्थलीमलिवपुर्व्योमाङ्गलग्नामिव

व्याप्तानन्तदिगन्तपूरकबृहद्देहो विशश्राम सः ।। ६७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे सूचीतपोवर्णनं नाम त्रिसप्ततितमः सर्गः ।। ७३ ।।